emptied तदाज्ञया तया तोये प्रयोगादपकर्षिते। मुद्रारत्नमयत्नेन भूपः कूपान्तरैक्षत ŚāliC. 4.155; 2 drawn away ध्रुवायां संप्रवृत्तायां पटे चैवापकर्षिते ... कार्यः प्रवेशः पात्राणाम् NāṭyaŚā. 12.3.

अपकर्षितक (apakarṣita-ka) *adj.* which had been removed व्याघ्रेण तत्पांशु अपकर्षितकं दृष्ट्वा ऋषिस्य कौतुहलं संजातम् MaVastuAva. i.353.15 [DBHS.]

अपकर्षितुम् (apa-karṣitum) *inf.* **1A** to remove, i.e. to dispel अदं दुःखम् ... विदित्वा अपकर्षयं शक्यं चेदपकर्षितुम् MahāBhā. i.148.1; **1B** to remove नात्युपयुञ्जीत पिप्पलीं क्षारमेव च। लवणं च ... श्लेष्माणं च्यावयित्वा तु नोत्सहेतापकर्षितुम् BhelaS. 67.24 (3.1); **2** to take away, to dissuade न ह्यहं त इमे सर्वे ... दण्डेन न त्वया शक्याः सुग्रीवादपकर्षितुम् Rāmā. iv.53.11.

अपकर्षिन् (apa-karṣin) *adj.* [*f.*–iṇī] **1** removing बोधिसत्त्वस्य कायप्रमुक्तया प्रभया ... नागराजस्य भवनमवभासितमभूत् ... सर्वक्लेशापकर्षिण्या LaliVi. 19.26 (2); **2A** decreasing ते हि (दोषाः) विकल्पप्रभवाः सत्यपि उपादाने कस्यचिन्मनोगुणस्य आभासात् (अभ्यासात्) अपकर्षिणः तत्पाटवे निरन्वयविनाशधर्माणः स्युर्ज्वालादिवदेव PramāVāSvopVṛ. 73.23; **2B** decreasing speed, i.e. dawdling, shuffling गुरुशकटधुरंधरस्तृणाशी समविषमेषु च लाङ्गलापकर्षी। जगदुपकरणं पवित्रयोनिर्नरपशुना न निमीयते गवेन्द्रः IndSpr. 870.

अपकर्षोक्ति (apakarṣokti) *f.* mention of inferiority साम्योत्कर्षापकर्षोक्तेरुपमानोपमेययोः ... प्रपञ्चोक्तिः प्रदर्श्यते SaraKaṇṭhā. 435.26.

अपकर्षोत्कर्ष (apakarṣotkarṣa) *m.* **1** degradation and upgradation, lower and higher rank or position करणादपकृष्टोत्कृष्टजात्योरपकर्षोत्कर्षावाह। जात्युत्कर्षेत्यादि DīpKa. 13.20 (*on* 1.96); **2** inferiority and superiority, cf. **अपकर्षोत्कर्षप्रतिपादन.**

अपकर्षोत्कर्षप्रतिपादन (apakarṣotkarṣa-pratipādana) *n.* act of conveying inferiority and superiority सर्वोत्कृष्टे एकवचनतया अतिनिकृष्टेऽस्मदर्थे बहुवचनतया व्याख्यानं तु सुतरामयुक्तमिति केचित्। तन्न। भेदाभेदप्रतिपादनेनापकर्षोत्कर्षप्रतिपादनाय तथैवौचित्यात् BālamBha. i.91.31 (*on* 1.24 1/2)

अपकर्षोपपत्ति (apakarṣopapatti) *f.* tenability of transference (of performance of a rite) to an earlier time अतत्कालत्वान्न तदर्थमिति चेत्। न, वचनेनापकर्षोपपत्तेः SaṅkarKāBh. 19.14 (*on* i.2.20)

अपकल् (apa-kal-) cf. अपकालयितव्य [Viśva.]

अपकलङ्क (apa-kalaṅka) *adj.* without blemish, stainless, pure इत्थं नास्ति राजत्वमपकलङ्कमृते देवदेवादमुतः सर्वद्वीपभुजो हर्षात् HarṣaC. 138.2.

अपकलङ्क (apa-kalaṅka) *m.* deep stain or mark of disgrace, MW.

अपकलहंसीसारसा (apa-kalahaṁsīsārasā) *adj.* (*f.*) without female goose and female crane पुरो मे सरिदपकलहंसीसारसेवाविरासीत् ŚṛṅgāTi. (Rā.) 226.

अपकलिताप (apa-kalitāpa) *adj.* free from pain or sorrow of strife जिनराजविसरम् ... नमामि .. अपकलितापम् CaturJistu. 70 (comm. अपगतकलहसंतापम्)

अपकल्क (apa-kalka) *adj.* sinless अपकल्कस्तु राजेन्द्र निस्तीर्यैतद् द्विजोत्तमः MahāBhā. i.1800*(5)

अपकल्मष (apa-kalmaṣa) *adj.* [*f.*–ā] **A** free from sin, sinless तत्संभवाम्भः अपकल्मषान्मुनीन् प्रक्षालयामास ViṣṇuP. i.4.27; PadmP. v.3.35; अवबोधि च यच्छान्तमदोषमपकल्मषम्। ऋषिरूपात्मने तस्मै विष्णो रूपाय ते नमः ViṣṇuP. iii.17.24; किं वक्ष्यन्त्यपकल्मषाः कृतधियः KāvyPra. 126.4 (comm. अपगतं कल्मषं पापकर्म येभ्यः); SaraKaṇṭhā. 127.18; AlaṅkāSa. 192.4; SaduktiKa. 137.23; SūktiMu. 43.30; Ekāva. iii.1.272; SāhiDa. 204.7; Subhāṣi. 1343; AlaṅkāŚe. 2.3 (17); Kuval. 171 (67); सा ... अग्रहारं द्विजन्मनाम्। सती कतीमुषां चक्रे रामुषां चापकल्मषा RājTa. (Ka.) 2.55; **B** free from impurity, pure शुभक्षेत्रगतं चाहमात्मानमपकल्मषम्। चन्द्रबिम्ब इवोन्मग्नं वेदवेद्य विदाम्बर YogVā. i.6.48; संप्रवृत्ता वयं द्रष्टुमात्मानमपकल्मषम् YogVā. v.4.9; श्रीजैनोल्लाभदीनोऽथ कश्मीरानपकल्मषः। अनुकूले विधातेव प्राविशद्विजयोर्जितः RājTa. (Jo.) 975; **C** free from stain, stainless, shining राजा तु वस्त्राभरणमनल्पमपकल्मषम्। साम्बायै दापयित्वास्यै तदास्थानं व्यसर्जयत् BṛKathāŚloSaṁ. 7.21.

अपकष् (apa-kaṣ-) I.P. **1** to scrape off यस्मा॒दृचो॒ अ॒पात॑क्षन् यजु॒र्यस्मा॑दु॒पाक॑षन्। ... तं ब्रूहि क॒त॒मः स्वि॑दे॒व सः AV. x.7.20; AV. (P.) xvii.9.1; **2** to take away, i.e. to remove गृहीत्वा मूर्ध्नि तच्छाखां विष्णुमूर्ध्नोऽपकाषताम् SkandP. ii (2). 45.16.

अपकषायत्व (apakaṣāya-tva) *n.* the state of being devoid of impurity, i.e. pure चेतसोऽपकषायत्वं यत्र सा ध्वस्तिरुच्यते MārkP. 39.22.

अपकान्त (apa-kānta) *adj.* not charming, not attractive or agreeable अपकान्ता वा अकमनीयाः सर्वेऽप्येवमेव नरकाः SthānṬ. 366B.8.

अपकान्तय (apa-kāntaya-) *denom.* to deprive of charm उपपौर्णमासि समये शशिनं क्षणमेत्य राहुरपकान्तयति Rāvaṇā. 17.24.

अपकाम (apa-kāmá) *m.* **1** suffering, displeasure, annoyance धन्व॑ना॒ गा धन्व॑ना॒जिं ज॑येम ... धनुः शत्रो॑रपका॒मं कृ॑णोति ṚV. vi.75.2, (comm. कामस्यापायम्); AV. (P.) xv.10.2; TaiS. IV.vi.6.1; MaiS. iii.16.3 (iii.185.13); KāṭhS. 46.1 (iv.172.10); VājaS. 29.39; VājaS. (K.) 31.14; **2** lack of willingness, aversion, abhorrence अङ्गि॑रस॒ पित॑रः सोम्या॑सः पा॒पमार्छ॑न्त्वपका॒मस्य॑ क॒र्ता AV. ii.12.5; AV. (P.) ii.5.5; (यक्ष्मः) य॒दि कामा॑दपका॒माद्धृ॒दया॒ज्जाय॑ते परि॑। हृ॒दो ब॒लास॒मङ्गे॑भ्यो ब॒हिर्निर्म॑न्त्रयामहे AV. ix.8.8; AV. (P.) xvi.74.8; आयुर् इह पपतामि संवत्सराय। अपकामस्य श्रे वत्सो देवीर् इव म आ ददे AV. (P.) xx. 23.1; [abominableness, MW.]

अपकाम (apa-kāma) *adj.* being devoid of will or desire कुटिलकमिति। वक्रदण्डको विदूषकोपयोगी। ब्रह्मायुधात्मा दण्डः। अपकामत्वेन भीषणत्वावात्यादपीत्यर्थः AbhinBhā. i.27.22 (*on* 1.60)

अपकामम् (apakāmam) *adv.* against one's will, unwillingly अ॒प॒का॒मं स्यन्द॑माना॒ अवी॑वरत वो॒ हि क॑म्। इन्द्रौ॒ वः शक्ति॑भिर्देवीः AV. iii.13.3; AV. (P.) iii.4.3; TaiS. V.vi.1.3; MaiS. ii.3.1 (ii.152.11); KāṭhS. 39.2.

अपकार (apa-kāra) *m.* **1A** offence **Bi** injury, harm, hurt [Inst.] by way of harming **ii** war, battle, discord, conflict **iii** punishment **Ci** evil doing, wrong act **ii** act of causing to be wicked **D** loss **2A** impediment, hindrance **B** absence of conduciveness or usefulness **3** reproach, despise, disdain **4A** adverse change **B** wrong or opposite idea **1A** offence महते योऽपकाराय नरस्य प्रभवेन्नरः। तेन वैरं समासज्य ... नाश्वसेत् MahāBhā. v.37.52; रामेण यदि ते पापे किञ्चित्कृतमशोभनम्। अपकारः क इह ते वैदेह्या दर्शितोऽधमे Rāmā. ii.873*.16; ii.873*.18; दानाध्ययनशीलाश्च ... प्रजाः। नापकारेषु वर्तन्ते परेषाम् ParaS. 26.32; तदेतस्यापकारस्य कथमद्य प्रतिक्रियाम्। कुर्याम् KathāSaSāg. v.3.236; गुरोश्चापकारं कृत्वा पादपतनादिना तं प्रसाद्य शिष्यः शुध्यति DīpKa. 104.1 (*on* 3.283); यथासारापकारमिति सारो धनं दण्डस्य अपकारोऽपराधः DaṇḍaVi. 22.7; सूहभट्टः ... अपकारान्मद्राजे चिन्तयन्नास्त RājTa. (Jo.) 731; **1Bi** injury, harm, hurt उपकाराद्धवेन्मित्रमपकाराद्भवेद्रिः MahāBhā. xii.200*.2; दशरथः ... न स्मरत्यपकाराणां शतमप्यात्मवत्तया Rāmā. ii.1.16; उपकारफलं मित्रमपकारोऽरिलक्षणम् Rāmā. iv.8.20; PañcT. 2.23 (203.7); Subhāṣi. 2802; उपकारापकारयोर्ईष्टप्रतिकारी ArthŚā. ii.226.1 (6.1); ततो जातास्त्विमा घोरा नानारूपा महाविषाः अपकाराय वर्तन्ते नृपसाधनवाहने ŚuśruS. v.8.92; खलस्याहेश्च वदनमपकाराय केवलम् Tantrākhyā. 49.22; PañcT. 1.161 (168.10); अयं मे मूषको महतोऽपकारान्करोति Tantrākhyā. 63.6; PañcT. 2.26 (42) (215.7); यत्राभिगमने व्ययवति पूर्वो विरुद्धः क्रोधादपकारं करिष्यति न वेति सक्तो वामर्षितो KāmSū. 358.13 (6.6); उपकारं सुहृद्वर्गे योऽपकारश्च शत्रुषु ... वर्षति प्राज्ञः MārkP. 20.30; अर्घ्याक्षेपातिक्रमकृत् ... सामन्तकुलिकादीनामपकारस्य कारकः पञ्चाशत्पणिको दण्ड एषाम् YājñaSm. 2.233; करोति महतीं प्रीतिमपकारोऽपकारिषु VeṇīSaṁ. 2.60; (क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः) अपकारो द्रोहः KāśiVṛ. *on* i.4.37; (वाक्यादेरामन्त्रितस्यासूया संमतिकोपकुत्सनभर्त्सनेषु) अपकारशब्दैर्भयोत्पादनं भर्त्सनम् KāśiVṛ. *on* viii.1.8; उपकर्त्रारिणा संधिर्न मित्रेणापकारिणा। उपकारापकारौ हि लक्ष्यं लक्षणमेतयो ŚiśuVa. 2.37; Hitopa. 4.16; दुर्जनाः। अपकारे समासक्ता परस्य स्वस्य च PadmP. (Ra.) 20.99; अपकारमिवातिसंधयस्तमसत्पक्षमिवापहेतवः। उपसेदुरुदायुधालयः क्षयकालीमलिनाः सनाभयः RāmC. 33.35; न हि क्वचिदपि लोके अविद्याध्यस्तेन धर्मेण उपकारः अपकारो वा दृष्टः GītāBh. (Śaṅ.) 362.5 (*on* 13.2); उपकारापकारौ हि धर्माधर्मयोर्लक्षणमिति प्रसिद्धमेवैतत् NyāyMañ. i.230.13; ये वै क्रूरा भोगिनो दुर्विनीतास्तेषामन्तो भविता नान्यथैतत्। कालप्राप्तं भक्षयध्वं तथाऽपकारे च कृते मनुष्यान् VarāP. 24.28; अपकारो द्रोहस्तदुपर्यवज्ञानं च ManuBh. i.150.27 (*on* 2.144); हिंसा हिंस्यमानस्य महानपकारः। ... यज्ञे तु हतानामुपकारः नापकारः नरकादिफलानुत्पत्तेः ManuBh. i.438.18 (*on* 5.40); क्षमा कृतेऽप्यपकारेऽपकारानारम्भः ManuBh. i.531.20 (*on* 6.92); Mitā. 41.13 (*on* 1.122); VīraMi. (Paribhāṣā.) 34.15; अत्यन्तकोऽपकारेण निरास्थन्न तदानवम्। अत्यन्तकोपकारेण निरास्थं नतदानवम् RāghPāṇ. (Dha.) 18.83; अपकारो भवेद्द्रोहो AbhidhāRaMā. 4.86; मृष्टाहारं ददात्यस्मै ... जिनदत्तापकाराय बन्धुश्रीः BṛKathāK. 64.33; एषः कुञ्जरः केनाप्यसुरेण राक्षसेन वा पूर्वजन्मनि मया कृतं स्मृत्वा कमप्यपकारमुत्पन्नकोपेनानुप्रविश्य नीयते वश्यम् TilaMañ. 243.4;